क्रोधपिशाचः

एकदा श्रीकृष्णः, बलरामः सात्यकिः च वनविहारार्थं गतवन्तः आसन् । वने ते मार्गभ्रष्टाः जाताः । निबिडं वनं प्रविष्टवन्तः। रात्रिः सञ्जाता । तैः रात्रिं यापयितुम् एकस्य वृक्षस्य अधः उपवेष्टव्यम् आपतितम् । 'रात्रौ रक्षणार्थम् एकैकः अपि पर्यायरूपेण एकं प्रहरं यावत् जागरितः भवेत्, तदा अन्याभ्यां द्वाभ्यां निद्रां कर्तुं शक्यते' इति ते निश्चितवन्तः ।

प्रथमः पर्यायः सात्यकेः आसीत् । सः प्रहरी सन् स्थितः । यदा अन्यौ द्वौ निद्रां कृतवन्तौ तदा वृक्षतः एकः पिशाचः अवतीर्णवान् । सः सात्यकिं मल्लयुद्धार्थम् आह्वातुम् आरब्धवान् । बहूनि कटुवचनानि उक्तवान् च । सात्यकिः तस्य कटुवचनानां कृते तादृशानि एव उत्तराणि दत्तवान् । यदा पिशाचः सात्यकेः शरीरे मुष्टिप्रहारं कृतवान् तदा सात्यकिः तदुपरि पादप्रहारं कृतवान् । पूर्णं प्रहरं यावत् तयोः मल्लयुद्धं प्राचलत् । तेन सात्यकेः शरीरे बहवः क्षताः सञ्जाताः । सः नितरां श्रान्तः । किन्तु तस्मिन् समये सहयोगिनोः उत्थापनस्य अपेक्षया निद्राकरणमेव उचितम् इति विचिन्त्य सः निद्रां कृतवान् ।

द्वितीयः पर्यायः बलरामस्य आसीत् । तम् अपि पिशाचः मल्लयुद्धार्थम् आहूतवान् । कटुवचनैः निन्दितवान् च । मल्लयुद्धे महावीरेण बलरामेण अपि सा एव गतिः प्राप्ता । श्रान्तः सः अपि प्रहरान्ते निद्रां कृतवान् ।

तृतीये पर्याये श्रीकृष्णः सुरक्षानिमित्तम् आगतवान् । तम् अपि पिशाचः मल्लयुद्धार्थम् आहूतवान् । कृष्णः हसन् एव युद्धं कर्तुम् आरब्धवान् । उक्तवान् च ''भवान् बहुविनोदप्रियः इव भासते ! मम निद्राम् आलस्यं च दूरीकर्तुमेव भवान् मित्रम् इव विनोदं कृर्वन् अस्ति'' इति । तदा पिशाचस्य बलं न्यूनं जातम् । तस्य शरीरम् अपि सङ्कुचत् गतम् । अन्ते सः 'झिल्लिका' इव लघु-शरीरः जातः । तदा श्रीकृष्णः तम् स्वस्य उत्तरीयस्य अञ्चले बद्धवान् ।

प्रातः यदा ते ततः प्रस्थिताः तदा सात्यकिः बलरामः च पिशाचेन सह रात्रौ सञ्जातस्य मल्लयुद्धस्य वर्णनं कृतवन्तौ । तेन सञ्जातान् क्षतान् अपि दर्शितवन्तौ । श्रीकृष्णः हसन् पिशाचम् उत्तरीयस्य अञ्चलतः निष्कास्य करतले स्थापितवान्, उक्तवान् च - ''एषः अस्ति क्रोधपिशाचः । एतस्य प्रकृतिः एषा अस्ति यत् प्रत्युत्तरदानेन एषः वर्धते, उग्रतां च प्राप्नोति । किन्तु यदि उपेक्षां कुर्मः तर्हि सः स्वयमेव दुर्बलः भवति, लघुरूपं प्राप्नोति'' इति ।

क्रोधपिशाचस्य स्वरूपं तदा ज्ञातवन्तौ सात्यकिबलरामौ ।

■■

● (सं) डा ।। रघुराम भट्टः